Yamunashtakam 1

યમુનાષ્ટકમ્ ૧

Document Information

```
Text title : yamunaashhTakam 1
File name : yamunaa81.itx
Category : aShTaka, devii, nadI, devI, shankarAchArya
Location : doc_devii
Author : Shankaracharya
Transliterated by : Sridhar Seshagiri seshagir at engineering.sdsu.edu
Proofread by : Sridhar Seshagiri seshagir at engineering.sdsu.edu
Latest update : August 23, 2000
Send corrections to : sanskrit at cheerful dot c om
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

sanskritdocuments.org

Yamunashtakam 1

યમુનાષ્ટકમ્ ૧

॥ શ્રીઃ ॥

મુરારિકાયકાલિમાલલામવારિધારિણી
તૃણીકૃતત્રિવિષ્ટપા ત્રિલોકશોકહારિણી ।
મનોઽનુકૂલકૂલકુઞ્જપુઞ્જધૂતદુર્મદા
ધુનોતુ નો મનોમલં કલિન્દનન્દિની સદા ॥ ૧॥

મલાપહારિવારિપૂરિભૂરિમણ્ડિતામૃતા
ભૃશં પ્રવાતકપ્રપઞ્ચનાતિપણ્ડિતાનિશા ।
સુનન્દનન્દિનાઙ્ગસઙ્ગરાગરઞ્જિતા હિતા
ધુનોતુ નો મનોમલં કલિન્દનન્દિની સદા ॥ ૨॥

લસત્તરઙ્ગસઙ્ગધૂતભૂતજાતપાતકા
નવીનમાધુરીધુરીણભક્તિજાતચાતકા ।
તટાન્તવાસદાસહંસસંસૃતાહ્નિકામદા
var1 સંસૃતા હિ કામદા var2 સંવૃતાહ્નિકામદા
ધુનોતુ નો મનોમલં કલિન્દનન્દિની સદા ॥ ૩॥

વિહારરાસસ્વેદભેદધીરતીરમારુતા
ગતા ગિરામગોચરે યદીયનીરચારુતા ।
પ્રવાહસાહચર્યપૂતમેદિનીનદીનદા
ધુનોતુ નો મનોમલં કલિન્દનન્દિની સદા ॥ ૪॥

તરઙ્ગસઙ્ગસૈકતાન્તરાતિતં સદાસિતા
શરન્નિશાકરાંશુમઞ્જુમઞ્જરી સભાજિતા ।
ભવાર્ચનાપ્રચારુણામ્બુનાધુના વિશારદા
ધુનોતુ નો મનોમલં કલિન્દનન્દિની સદા ॥ ૫॥

જલાન્તકેલિકારિચારુરાધિકાઙ્ગરાગિણી

સ્વભર્તુરન્યદુર્લભાઙ્ગતાઙ્ગતાંશભાગિની ।
સ્વદત્તસુપ્તસપ્તસિન્ધુભેદિનાતિકોવિદા
ધુનોતુ નો મનોમલં કલિન્દનન્દિની સદા ॥ ૬॥

જલચ્યુતાચ્યુતાઙ્ગરાગલમ્પટાલિશાલિની
વિલોલરાધિકાકચાન્તચમ્પકાલિમાલિની ।
સદાવગાહનાવતીર્ણભર્તૃભૃત્યનારદા
ધુનોતુ નો મનોમલં કલિન્દનન્દિની સદા ॥ ૭॥

સદૈવ નન્દિનન્દકેલિશાલિકુઞ્જમઞ્જુલા
તટોત્થફુલ્લમલ્લિકાકદમ્બરેણુસૂજ્જ્વલા ।
જલાવગાહિનાં નૃણાં ભવાબ્ધિસિન્ધુપારદા
ધુનોતુ નો મનોમલં કલિન્દનન્દિની સદા ॥ ૮॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છંકરભગવતઃ કૃતૌ
યમુનાષ્ટકં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Sridhar Seshagiri

Yamunashtakam 1
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*